दयापहरणेनापि मम प्राणा गताः किल ॥
दुःखेन महता चैव यदाहं पीड़ितः पुरा ।
तथा दुःखं प्रदत्त्वाहं द्रव्यं सुदारुणमुत्तमम् ॥
भोगेन सर्व्वमादाय चिरादिच्छास्य सौम्यवत् ।
गतोऽस्मि स्वगृहत्वाद्य कस्याहं सुत ईदृशः ॥
न चैषोऽपि पिता पूर्व्वमद्यैव न च कस्यचित् ।
पिशाचत्वं मया दत्तमद्यैव च दुरात्मनः ॥
एवमुक्त्वा प्रयात्येव तं प्रहस्य पुनः पुनः ।
प्रयात्यनेन मार्गेण दुःखं दत्त्वा सुदारुणम् ॥
एवं न्यासस्य सम्बन्धात् पुत्त्राः किन्ते भवन्ति वै ।
संसारे दुःखबहुला दृश्यन्ते यत्र तत्र हि ॥१॥
ऋणसम्बन्धिनः पुत्त्रान् प्रवक्ष्यामि तवाग्रतः ।
ऋणं यस्य गृहीत्वा यः प्रयाति मरणं किल ॥
अन्नदाता सुतो भूत्वा भ्राता वाथ पिता प्रियः ।
मित्ररूपेण वर्त्तेत अन्तर्दुष्टः सदैव सः ॥
गुणं नैव प्रपश्येत स क्रूरो निष्ठुराकृतिः ।
जल्पते निष्ठुरं वाक्यं सदैव स्वजनेषु च ॥
नित्यं मिष्टं समश्नाति भोगान् भुञ्जीत नित्यशः ।
द्यूतकर्म्मरतो नित्यं चौरकर्म्मणि नित्यशः ॥
गृहाद्द्रव्यं बलाद्धर्त्ता वार्य्यमाणः प्रकुप्यति ।
पितरं मातरञ्चैव कुत्सते च दिने दिने ॥
द्रावकस्त्रासकश्चैव बहुनिष्ठुरजल्पकः ।
वञ्चयित्वैव मुद्राश्च हृत्वा सुखेन तिष्ठति ॥
जातकर्म्मादिभिर्व्वाल्ये द्रव्यं गृह्णाति दारुणः ।
पुनर्व्विवाहसंयोगान्नानाभेदैरनेकधा ॥
एवं संचीयते द्रव्यं नैवमेतद्ददात्यपि ।
गृहक्षेत्रादिकं सर्व्वं ममैव हि न संशयः ॥
पितरं मातरञ्चैव वदत्येवं दिने दिने ।
सुदृढैर्म्मुषलैश्चैव कशाघातैस्तु दारुणैः ॥
मृते तु तस्मिन् पितरि तथा मातरि निष्ठुरम् ।
निःस्नेहो निर्घृणश्चैव जायते नात्र संशयः ॥
श्राद्धकार्य्याणि दानानि न करोति कदाचन ।
एवंविधास्त्वयः पुत्त्रा भवन्ति च महीतले ॥ २ ॥
रिपुपुत्त्रं प्रवक्ष्यामि तवाग्रे द्विजपुङ्गव ! ।
बाल्ये वयसि संप्राप्ते रिपुवद्वर्त्तते सदा ॥
पितरं मातरञ्चैव क्रीड़मानो हि ताड़येत् ।
ताड़यित्वा प्रयात्येवं प्रहस्यैव पुनः पुनः ॥
पुनरायाति तं तत्र पितरं मातरं पुनः ।
सक्रोधो वर्त्तते नित्यं वैरकर्म्मणि सर्व्वदा ॥
पितरं मारयित्वा तु मातरञ्च पुनः पुनः ।
प्रयात्येवं स दुष्टात्मा पूर्व्ववैरानुभावतः ॥ ३ ॥*॥
अथातः संप्रवक्ष्यामि यस्माल्लभ्यो भवेत् प्रियः ।
जातमात्रः प्रियं कुर्य्याद्वाल्ये नटनक्रीड़नैः ॥
वयः प्राप्य प्रियं कुर्य्यान्मातापित्रोरनन्तरम् ।
भक्त्या संतोषयेन्नित्यं तावुभौ परिपालयेत् ॥
स्नेहेन वचसा चैव प्रियसम्भाषणेन च ।
मृतौ गुरू समाज्ञाय स्नेहेन रुदते पुनः ॥
श्राद्धकर्म्माणि सर्व्वाणि पिण्डदानादिकां क्रियाम् ।
करोत्येवं सुदुःखार्त्तस्तेभ्यो यात्रां प्रयच्छति ॥
ऋणत्रयान्वितः स्नेहाद्विर्य्यापयति निश्चितः ।
यस्माल्लभ्यं भवेत् कान्त प्रयच्छति न संशयः ।
पुत्त्रो भूत्वा महाप्राज्ञः अनेन विधिना किल ॥४॥

उदासीनं प्रवक्ष्यामि तवाग्रे प्रिय ! साम्प्रतम् ॥
उदासीनेन भावेन सदैव परिवर्त्तते ।
ददाति नैव गृह्णाति न क्रुध्यति न तुष्यति ॥
नैवोपयाति संत्यज्य उदासीनो द्विजोत्तम ! ।
तवाग्रे कथितं सर्व्वं पुत्त्राणां गतिरीदृशी ॥
यथा पुत्त्रास्तथा भार्य्या पिता माता च बान्धवाः ।
भृत्याश्चान्ये समाख्याताः पशवस्तुरगास्तथा ।
गजा महिष्यो दास्यश्च ऋणसम्बन्धिनस्त्वमी ॥”*॥
सुपुत्त्रलक्षणं यथा,—

वशिष्ठ उवाच ।

“पुत्त्रस्य लक्षणं पुण्यं तवाग्रे प्रवदाम्यहम् ।
पुण्यप्रसक्तो यस्यात्मा सत्यधर्म्मरतः सदा ।
बुद्धिमान् ज्ञानसम्पन्नस्तपस्वी वाग्विदांवरः ॥
सर्व्वकर्म्मसु सन् धीरो वेदाध्ययनतत्परः ।
सर्व्वशास्त्रप्रवक्ता च देवब्राह्मणपूजकः ॥
याजकः सर्व्वयज्ञानां दाता त्यागी प्रियंवदः ।
विष्णुध्यानपरो नित्यं शान्तो दान्तः सुहृत्सदा ॥
पितृमातृपरो नित्यं सर्व्वस्वजनवत्सलः ।
कुलस्य तारको विद्वान् कुलस्य परिपोषकः ॥
एवं गुणैः सुसंयुक्तः सुपुत्त्रः सुखदायकः ॥”*॥
पुत्त्रस्य जङ्गमतीर्थत्वं यथा,—
“सर्व्वतीर्थाधिकं तीर्थं पुत्त्रतीर्थमुदाहृतम् ।
यद्वेणो वैष्णवद्वेषी सर्व्वधर्म्मवहिष्कृतः ॥
पृथुना पुत्त्रतीर्थेन पवित्रोऽगात् परं पदम् ॥
सत्पुत्त्रं परमं तीर्थं प्राप्य सुखन्ति पूर्व्वजाः ।
पितापि ऋणमुक्तः स्याज्जाते पुत्त्रे महात्मनि ॥”
वैष्णवपुत्त्रस्य पूर्व्वपुरुषत्रातृत्वं यथा,—
“वैष्णवो यदि पुत्त्रः स्यात् स तारयति पूर्व्वजान् ।
पितॄनधन्यस्तदा वंशास्तारयन्त्यतिपावनाः ॥”*॥
कुपुत्त्रजनने पितॄणां नरकगमनं यथा,—
“तथा यदि कुपुत्त्रः स्यात्तेन मज्जन्ति पूर्व्वजाः ।
सुघोरे नरके दीनाः भ्रमन्ति च मुहुर्म्मुहुः ॥
यथा जलं कुप्लवेन तरन्मज्जति मूढ़धीः ।
तथा पिता कुपुत्त्रेण तमस्यन्धे निमज्जति ॥
जातमात्रे कुले जन्तौ संप्रेरते पितामहाः ।
किमेषोऽधो नयेदस्मानूर्द्धं वा वैष्णवो भवन् ॥”
इति पाद्मे भूमिखण्डे ११ । १२ । १८ । १२० ।
अध्यायाः ॥ * ॥
सप्तविधपुत्त्रा यथा,—
“वरजो वीर्य्यजश्चैव क्षेत्रजः पालकस्तथा ।
विद्यामन्त्रसुतानाश्च गृहीता सप्तमः सुतः ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५६ अध्यायः ॥*॥
पुत्त्रसुखदर्शने पुण्यं यथा,—

पार्व्वत्युवाच ।

“गृहमागत्य प्राणेश ! तपसां फलदायकम् ।
कल्पे कल्पे ध्यायते यं तं पश्यागत्य मन्दिरम् ॥
पौत्रं पुत्त्रमुखं पश्य पुण्यबीजं महोत्सवम् ।
पुन्नामनरकत्राणकारणं भवतारणम् ॥
स्नातश्च सर्व्वतीर्थेषु सर्व्वयज्ञेषु दक्षिणा ।
पुत्त्रस्य दर्शनस्यास्य कलां नार्हन्ति षोड़शीम् ॥
सर्व्वदानेन यत् पुण्यं यत् पृथिव्याः प्रदक्षिणम् ।
पुत्त्रदर्शनपुण्यस्य कलां नार्हन्ति षोड़शीम् ॥

सर्व्वैस्तपोभिर्यत् पुण्यं यदेवानशनैर्व्रतैः ।
सत्पुत्त्रोद्भवपुण्यस्य कलां नार्हन्ति षोड़शीम् ॥
यद्विप्रभोजनैः पुण्यं यदेव सुरसेवनैः ।
सत्पुत्त्रप्राप्तिपुण्यस्य कलां नार्हन्ति षोड़शीम् ॥”
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ८ अध्यायः ॥*॥
पुत्त्रोत्सवविधिर्यथा,—
“परं पुत्त्रोत्सवं नन्दश्चकार परमादरात् ।
ददौ यशोदा गोपीभ्यो ब्राह्मणीभ्यो ददौ मुदा ।
धनानि नानावस्तूनि तैलसिन्दूरमेव च ॥”
अपि च ।
“नन्दः सचेलः स्नात्वा च धृत्वा धौते च वाससी ।
पारम्पर्य्यविधिं तत्र चकार हृष्टमानसः ॥
ब्राह्मणान् भोजयामास कारयामास मङ्गलम् ।
वाद्यानि वादयामास वन्दिभ्यश्च ददौ धनम् ॥
ततो नन्दश्च सानन्दं ब्राह्मणेभ्यो ददौ धनम् ।
सद्रत्नानि प्रवालानि हीरकाणि च सादरम् ॥
तिलानां पर्व्वतान् सप्त सुवर्णं काञ्चनं मुने ! ।
रौप्यं धान्याचलं वस्त्रं गोसहस्रं मनोहरम् ॥
दधि दुग्धं शर्कराश्च नवनीतं घृतं मधु ।
मिष्टान्नं लड्डुकौघञ्च स्वादूनि मोदकानि च ॥
भूमिश्च सर्व्वशस्याढ्या वायुवेगांस्तुरङ्गमान् ।
ताम्बूलानि च तैलानि दत्त्वा हृष्टो बभूव ह ॥”
पुत्त्रप्रशंसा यथा,—
“धनं धान्यञ्च रत्नं वा यत्तत् सर्व्वं पुत्त्रहेतुकम् ।
न भक्षितं यत् पुत्त्रेण तद्द्रव्यं निष्फलं भुवि ॥
शतकूपाधिका वापी शतवापीसमं सरः ।
सरःशताधिको यज्ञः पुत्त्रो यज्ञशताद्वरः ॥
तपोदानोद्भवं पुण्यं जन्मान्तरसुखप्रदम् ।
सुखप्रदोऽपि सत्पुत्त्रः प्राणेभ्योऽपि सुनिश्चितम् ।
पुत्त्रादपि परो बन्धुर्न भूतो न भविष्यति ॥”
पुत्त्रात् पराजये आनन्दयुक्तत्वं यथा,—
“नन्दः सपुलको हृष्टः सभार्य्यः साश्रुलोचनः ।
आनन्दयुक्ता मनुजा यदि पुत्त्रैः पराजिताः ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८ । १४ । २१
अध्यायाः ॥ * ॥
बहवः पुत्त्राः काम्याः । यथा,—
“एष्टव्या बहवः पुत्त्रा यद्येकोऽपि गयां व्रजेत् ।
यजेद्वा चाश्वमेधेन नीलं वा वृषमुत्सृजेत् ॥”
मातापित्रोराज्ञाकारिकनिष्ठपुत्त्रस्यापि राज्य-
भागित्वं यथा,—

ययातिरुवाच ।

“पुत्त्रो यस्त्वनुवर्त्तेत स राजा पृथिवीपतिः ।
भवन्तः प्रतिजानन्तु पूरू राज्येऽभिषिच्यताम् ॥

प्रकृतय ऊचुः ।

यः पुत्त्रो गुणसम्पन्नो मातापित्रोर्हितः सदा ।
सर्व्वं सोऽर्हति कल्याणं कनीयानपि स प्रभुः ॥”
इति मात्स्ये २२।२४ अध्यायौ ॥ * ॥
सत्पुत्त्रोत्पत्तिमात्रेण पुन्नामनरकत्राणं स्वर्ग-
गमनञ्च । यथा,—
“सत्पुत्त्रेण मुनिश्रेष्ठाः समुत्पन्नेन दुर्म्मतिः ।
उत्ततारान्वियात् स्वर्गं पुन्नामनरकाद्द्रुतम् ॥”
इत्यग्निपुराणम् ॥